



The following is a rare hymn on **Lord Krishna** by **Garuda** taken from **Harivamsha Mahapuranam, Vishnu Parva** and **Chapter 121**.

गरुड उवाच –

वेदाध्यक्षः सुराध्यक्षः सर्व-काम-प्रदो भवान् ।
अमोघ-दर्शनस् त्वं हि वरार्थिषु-वर-प्रदः ॥ १ ॥

चतुर्भुजश् चतुर्मूर्तिश् चातुर्होत्र-प्रवर्तकः ।
चातुराश्रम्यहोता च चतुर्नेता महाकविः ॥ २ ॥

धनुर्धरश् चक्रधरो भवाञ् छङ्खधरो महान् ।
भवान् पूर्वेषु देहेषु ख्यातो भूमिधरः प्रभो ॥ ३ ॥

लाङ्गली मुसली चक्री देवकी-तनयो भवान् ।
चाणूर-मथनश् चैव गोप्रियः कंसहा भवान् ॥ ४ ॥

गोवर्धनधरश् चैव मल्लारिर् मल्ल-भावनः ।
मल्लप्रियो महामल्लो महापुरुष इत्यपि ॥ ५ ॥

विप्रप्रियो विप्रहितो विप्रज्ञो विप्रभावनः ।
ब्रह्मण्यश्च वरेण्यश्च भवान् दामोदरः स्मृतः ।
प्रलम्ब-मथनश् चैव केशिहा दानवान्तकः ॥ ६ ॥

असिलोम्नश्च हन्ता च तथा रावण-नाशनः ।
विभीषणस्य भगवान् राज्यदो वालि-नाशनः ॥ ७ ॥

सुग्रीव-राज्यदाता त्वं बलि-राज्याऽपहारकः ।
रत्नहर्ता महारत्नं समुद्रोदर-सम्भवम् ॥ ८ ॥

वरुणश्च भवान् ख्यातो भवांश्च सरिद् उद्भवः ।
भवान् खड्गधरो धन्वी धनुर्धरवरो महान् ॥ ९ ॥

दाशार्ह-इति-विख्यातो महाधन्वा धनुः-प्रियः ।
गोविन्द-इति-विख्यात उदधिस् त्वं च सुव्रत ॥ १० ॥

आकाशश्च तपश् चैव समुद्र-मथनो भवान् ।
भवान् स्वर्गो बहुफलो भवान् स्वर्गधरो महान् ॥ ११ ॥

त्वमेव च महामेघो बीज-निष्पत्तिरेव च ।
त्रैलोक्य-मथनस् त्वं च क्रोध-लोभ-मनोरथः ॥ १२ ॥

भवान् कामप्रदश् चैव कामः सर्वधनुर्धरः ।
संवर्तो-वर्तनश् चैव प्रलयो निलयो महान् ॥ १३ ॥

हिरण्यगर्भो रूपज्ञो रूपवान् मधुसुदनः ।
ईशस् त्वं च महादेव असङ्ख्येय-गुणान्वितः ॥ १४ ॥

स्तोतुं-इच्छसि मां देव स्तोतव्यस् त्वं यदूत्तम ।
चक्षुषा ये त्वया घोराः प्राणिनो हि निरीक्षिताः ॥ १५ ॥

हतास्ते यम-दण्डेन तिर्यङ् निरय-गामिनः ।
ये त्वया परम-प्रीत्या प्राणिनो वै निरीक्षिताः ॥ १६ ॥

इह च प्रेत्य ते सर्वे सर्वथा स्वर्ग-गामिनः ।
एष तेऽहं महाभागो वशगः शासने स्थितः ॥ १७ ॥

---

॥ इति श्रीमहाभारते खिलभागे हरिवंशे विष्णु-पर्वणि गरुड-कृत श्रीकृष्ण-स्तुतिः सम्पूर्णम् ॥